मारीचमाशु विशिखेन यथा कमुग्रः” ॥)
कामदेवः ॥ अग्निः ॥ वायुः ॥ यमः ॥ सूर्य्यः ॥ आत्मा ॥ राजा ॥ ग्रन्थिः ॥ मयूरः ॥ इति मेदिनी ॥ मनः ॥ शरीरम् ॥ कालः ॥ धनम् ॥ शब्दः ॥ इत्यनेकार्थकोषः ॥ प्रकाशः ॥ इत्येकाक्षरकोषः ॥
कः, त्रि, सर्व्वनाम । इति विश्वः । के कि इति भाषा ॥ (यथा विष्णुपुराणे । १ । १७ । २० ।
“तमृते परमात्मानं तात ! कः केन शास्यते” ॥)
कंशः, पुं क्ली, कंसः । पानपात्रम् । इत्यमरटीका ॥
कंसं, क्ली पुं, (कामयति काम्यते वा अनेन पातुमितिशेषः । “वृतृवदिहनिकमीति” सः । उणां । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमरः ॥ २ । ९ । ३२ । कंशम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरजतादिनिर्म्मितपात्रमात्रम् । मानविशेषः तत्तु आढ़कपरिमाणम् । इति मेदिनी ॥ (चतुःषष्टिपलात्मकाढ़करूपम् ॥ यथा भावप्रकाशे ।
“शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुः प्रस्थैस्तथाढ़कः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलश्च सः” ॥
ताम्रवङ्गमिश्रितधातुविशेषः । काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्रार्द्धम् ४ । इति त्रिकाण्डशेषः ॥ (वर्त्तुलाकारयज्ञियपात्रभेदः । यथा शतपथब्राह्मणे ।१४।९।३।१ ।
“औडुम्बरे कंसे चमसे वा” ।)
कंसः, पुं, (कामयति पित्रादिबन्धुवर्गान् अभिभूय पापात्मकं राज्यविषयादिभोगं यः । कम् + सः । यद्वा कंस्ते शास्ति शत्रून् कंस शासने इत्यस्मात् अः ।) विष्णुद्वेष्टृसुरविशेषः । इति हेमचन्द्रः ॥ स तु मथुरादेशराजा । यदुवंशीयोग्रसेनराजपुत्रः । श्रीकृष्णमातुलः । तेन बधः प्राप्तः । (एतद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् ॥ कंसनामकारणं हरिवंशे यथा,
“कस्य त्वमिति यच्चाहं त्वयोक्तो मत्तकाशिनि ।
कंसस्तस्माद्रिपुध्वंसी तव पुत्त्रो भविष्यति” ॥
अतएव कंसधातुनिष्पन्नत्वमेव प्रशस्यते ॥)
कंसकं, क्ली, (काम्यतेऽनेन चक्षुर्दृष्ट्यादिकमिति-शेषः । कम् + सः । ततो जातौ संज्ञायां वा कन् ।) चक्षुरौषधधातुविशेषः । स तु हीराकसीप्रभेदः । तत्पर्य्यायः । पुष्पकासीसम् २ । नयनौषधम् ३ । इति हेमचन्द्रः ॥
कंसकारः, पुं, स्त्री, (कंसं तन्मयपात्रादिकं करोति यः । कंस + कृ + “कर्म्मण्यण्” । ३ । २ । १ । केचित्तु तालव्यशकारमिच्छन्त्यत्र ।) जातिविशेषः । काँसारि इति भाषा । तस्योत्पत्तिर्यथा ।
“वैश्यायां ब्राह्मणाज्जातः अम्बष्ठो गान्धिको वणिक् ।
कंसकारशङ्खकारौ ब्राह्मणात् सम्बभूवतुः” ॥
इति बृहद्धर्म्मपुराणम् । अपि च ।
“विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्त्राश्च षड़ेते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षड़ेते शिल्पिनो नराः” ॥
इति ब्रह्मवैवर्त्तपुराणम् ॥
कंसजित्, पुं, (कंसं जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति हलायुधः ॥
कंसवती, स्त्री, (कंसः शासनशक्तिरस्त्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंसः भ्रातृत्वेनास्त्यस्याः ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।.(यथा भागवते । ९ । २४ । २५ ।
“कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः” ॥)
कंसहा, [न्] पुं, (कंसं हन्ति हतवान् वा । कंस + हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥
कंसा, स्त्री, (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ९ । २४ । २५ ।
“कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः” ॥)
कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः ॥ १ । १ । २१ ॥
कंसारिः, पुं, (कंसस्य अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा राजतरङ्गिण्यां । १ । ५९ ।
“साहाय्यकार्थमाहूतो जरासन्धेन बन्धुना ।
समं रुरोध कंसारेर्मथुरां पृथुभिर्ब्बलैः” ॥)
कंसास्थि, क्ली, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति त्रिकाण्डशेषः ॥
कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषसम्बन्धात् उद्भवति या । यद्वा कंसायाः निर्झरिण्या उद्भवा कंसायां उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंस इव शुभ्रत्वात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । आढ़की २ तुवरी ३ काक्षी ४ मृदाङ्गया ५ सौराष्ट्री ६ पार्व्वती ७ कालिका ८ पर्पटी ९ सती १० । इति हेमचन्द्रः ॥
कक इ ङ व्रजने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ कर्म्मणि कङ्क्यते । ङ कङ्कते । इति दुर्गादासः ॥
कक ङ इच्छायां । गर्व्वे । चापले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं-च-सेट् ।) इच्छेह तृष्णा । चापलं चञ्चलीभावः । ङ ककते काकः । सतृष्णश्चञ्चलो वा स्यादित्यर्थः । गर्व्वः कैश्चिन्न पठ्यते । इति दुर्गादासः ॥
ककन्दः, पुं, (कको गर्व्वश्चापल्यं वा भवत्यस्मात् । कक + अन्दच् । यद्वा ककं गर्व्वं चापल्यं तृष्णां वा ददातीति । कक् + दा + डः ।) स्वर्णः । इत्युणादिकोषः ॥
ककुञ्जलः, पुं स्त्री, (कं जलं कूजयति आकूयते याचते इति यावत् । क + कूज् + अलच् । पृषोदरादित्वात् नुम् ह्रस्वश्च ।) चातकपक्षी । इति राजवल्लभः ॥
ककुत्, [द्] स्त्री, (कं सुखं कावयति गृहस्थस्य औन्नत्यं प्रापयतीति यावत् । वृषाणां हि ककुत् गृहस्थस्य सुखलक्षणमिति भावः । ककुद्धीनवृषपालने दरिद्रता इति स्मरणात् ! क + कु + णिच् + पृषोदरादित्वात् ह्रस्वः तुगागमश्च ।) वृषाङ्गविशेषः । षाँड़ेर झुँट् इति भाषा । (यथा, अथर्व्ववेदे । ६ । ८६ । ३ । “सम्राड़स्य सुराणां ककुन् मनुष्याणाम् । देवानामर्द्धभागसि त्वमेको वृषो भव” ॥ स्कन्धभागः ॥
यथा, भागवते ५ । २५ । ७ । “ध्यायमानः सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति” ॥) ध्वजः । वरः । इति मेदिनी ॥ (यथा, ऋग्वेदे । ८ । ४४ । १६ ।
“अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्” ॥)
ककुत्स्थः, पुं, (वृषरूपधरस्य देवेन्द्रस्य ककुदि तिष्ठति यः सः । ककुत् + स्था + कः ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामायं ।) शशादराजपुत्त्रः । इक्ष्वाकुराजपौत्त्रश्च ॥ (येन चासौ ककुत्स्थनामासीत् तत्कथा हरिवंशे १ । ११ । १९—२० ॥
“शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ॥
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन सः स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः” ॥
तथा च महाभारते १ । १ । २२९ ।
“पुरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः ।
अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः” ॥)
स्कन्धदेशस्थिते त्रि ॥)
ककुदः, पुं स्त्री, (कं सुखं उत्कर्षं वा कौति प्रकाशयति धातूनामनेकार्थत्वात् कुधातुरत्र प्रकाशनार्थः अन्तर्ण्यन्तार्थश्च । कु + क्विप् तुक् च पृषोदरादित्वात् तस्य दः । यद्वा कस्य सुखस्य शरीरस्य वा कुं भूमिं मूलं आकरमिति यावत् ददातीति । ककु + दा + कः । यद्वा “ककुदस्यावस्थायां लोपः” । ५ । ४ । १४६ । अर्द्धर्चादि-पां । २ । ४ । ३१ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १० । १० । १९ ।
“ऊर्द्धो बिन्दुरुदचरद् ब्रह्मणः ककुदादधि” ।
रघुश्च । ६ । ७१ ॥
“इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः” ॥)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा रघुः । ३ । ७० ।
“अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम्” ॥)
वृषाङ्गम् । झुँट इति भाषा । इत्यमरः ॥ १ । ३ । ९१ ॥ (यथा महाभारते । १३ । १४ । २३६-२३९ ।
“वृषरूपधरं साक्षात् क्षीरोदमिव सागरम् ।
कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ॥